दैनिकम् ई-संस्कृतवार्तापत्रम्

# हिमसंस्कृतवार्ता

■ पृष्ठ-5 ■ वर्ष-5 ■ अङ्क-94 | 1 | जनवरी 25, 2026 | Website- www.himsanskritam.com | Email-himsanskrit@gmail.com

**पञ्चाङ्गम्**

अद्य सिद्धार्थी वि.सं. २०८२,
कलियुगाब्धः ५१२७ शिशिर-ऋतुः
सूर्यः उत्तरायणम् माघशुक्लसप्तमी
माघ 12 प्रविष्टांशः मङ्गलमयः भवेत्

2 हिमाचलप्रदेशस्य ४७ नगरनिकायेषु प्रशासकाः नियुक्ताः; विकासकार्याणां कृते सर्वकारेण प्रदत्ताः वित्तीयाधिकाराः

3 हिममयं हिमाचलम्- हिमाचले ११ स्थानेषु तापमानं शून्यतः न्यूनम्; किमर्थं आवश्यकी हिमवृष्टिः, अस्मिन् वर्षे विलम्बः किमर्थम्?

4 महिलाभिः स्वयं स्वव्यक्तित्वस्य निर्माणं करणीयम्- प्रो. ललिता चन्द्रात्रे

## प्रशासनं देश-विदेशे च यूनां कृते नूत्नावसराणां सृजने प्रयासरतो विद्यते- प्रधानमन्त्री





**हिमसंस्कृतवार्ता।** प्रधानमन्त्रिणा नरेन्द्रमोदिना समुदीरितं यत् प्रशासनं देश-विदेशे च यूनां कृते नूत्नावसराणां सृजने प्रयासरतो विद्यते। तेनोक्तं यत् भारतं सम्प्रति विभिन्नैः देशैः सह व्यापारे आवागमने च संधिं करोति येन हि कुशलयुवभ्यः अवसराः उद्घाटिताः भवेयुः। प्रधानमन्त्रिणा एतत् नवदिल्ल्यां आयोजिते अष्टादशतमे "राष्ट्रीय-रोजगार मेला" कार्यक्रमे आभासीय-माध्यमेन उक्तम्।देशस्य सुदृढार्थव्यवस्थायाः विषये भाषमानः श्री मोदी अवोचत् यत् एषा विश्वस्य एकमात्र-अर्थव्यवस्था वर्तते, यया विगतैकवर्षे जी.डी.पी. द्विगुणितं कृतम्। जनवरी मासस्य चतुर्विंशतिदिनाङ्कस्य महत्वस्य विषये भाषमानः श्री मोदिना कथितं यत् अयं स एव दिवसः यदा संविधाने "जन-गण-मन" राष्ट्रगानत्वेन सममेव 'वंदे मातरम्' राष्ट्रगीतत्वेन मान्यता प्रदत्ता। रोजगार मेलायाः विषये कथयन् प्रधानमन्त्री श्री मोदी अब्रवीत् यत् रोजगार मेला अधुना संस्थागत् वर्तते अपि च लक्षाधिकाः युवानः नैकेषु सर्वकीय विभागेषु नियुक्तिपत्राणि च प्राप्नुवन्।असौ एतत् अपि उक्तवान् यत् षड्विंशत्यधिक द्विसहस्रतमवर्षस्य आरम्भः प्रत्यग्रस्य प्रसन्नतयाः प्रतीको वर्तते, यत् सम्प्रति एव वसंतपंचमी उत्सवः समाचरितम्।

### राष्ट्रीयरोजगार मेलायाः उद्देश्यं युवभ्यः उत्तमावसराणां प्रदानं वर्तते

हिमसंस्कृतवार्ता।केन्द्रीय पर्यटनराज्य मन्त्री सुरेशगोपी अवदत् यत् राष्ट्रीय रोजगार मेलायाः उद्देश्यं युवभ्यः उत्तमावसराणां प्रदानं वर्तते। मंत्री अद्य तिरुवनंतमपुरम इत्यस्य पल्लीपुरम, सी-आर-पी-एफ ग्रुप सेंटर इत्यत्र आयोजिते रोजगार मेला कार्यक्रमे भागं गृहीतवान्। श्री गोपिना सवलं कथितं यत् एताः नियुक्तयः न केवलं यूनां भविष्यं सुरक्षितं करोति वरं तेभ्यः राष्ट्रं प्रति दायित्वमपि यच्छति।

### नरेन्द्रमोदिनः नेतृत्वे प्रशासनेन वृत्यवसरप्रदानेन यूनां कल्याणाय नूतनपदक्षेपाः समुत्थापिताः-डॉ.एल. मुरूगनः



हिमसंस्कृतवार्ता। सूचना एवं प्रसारण मन्त्री डा. एल. मुरुगन वर्यः उक्तवान् यत् नरेन्द्रमोदिनः नेतृत्वे प्रशासनेन वृत्यवसरप्रदानेन यूनां कल्याणाय नूतनपदक्षेपाः समुत्थापिताः। मन्त्रिणा चेन्नईयाः अवडी इत्यत्र सी.आर.पी.एफ. इत्यस्य एकस्मिन् कार्यक्रमे केन्द्रीय मंत्रालयनां विभागानां च अभ्यर्थिभ्यः नियुक्तिपत्राणि प्रदत्तानि। देशोऽयं विकसितभारतं प्रति एति। इति कथयन् डा. मुरुगनः उक्तवान् यत् सप्तचत्वारिंशदधिक द्विसहस्रतमे वर्षे भारतं महाशक्तित्वेन निष्प्रचं भाति।

## भारतरत्न-कर्पूरी ठाकुर-वर्यस्य जन्मदिवसस्य अवसरे श्रद्धाञ्जलिम् अर्पितवान् उपराष्ट्रपतिः

हिमसंस्कृतवार्ता। उपराष्ट्रपतिः सी. पी. राधाकृष्णन् वर्यः भारतरत्न-कर्पूरी ठाकुर-वर्यस्य जन्मदिवसस्य अवसरे श्रद्धाञ्जलिम् अर्पितवान्। सामाजिकान्तर्जालीये सन्देशे उपराष्ट्रपतिः श्री-ठाकुरं साक्षात् जननायकः इति वर्णितवान्, तस्य सरलतायाः, सत्यनिष्ठायाः, वञ्चितानां उत्थानाय अविचलप्रतिबद्धतायाः च कृते स्मरणं कृतवान्।

## प्रधानमन्त्री मन की बात

हिमसंस्कृतवार्ता।प्रधानमन्त्री नरेन्द्र मोदी अद्य प्रातः एकादशवादने आकाशवाणीतः 'मन की बात' इति कार्यक्रमे स्वीयं मनोगतं प्रकटयिष्यति। मासिकस्य आकाशवाणी-कार्यक्रमस्य एतत् त्रिंशत्यधिकैकशततमं संस्करणं भविष्यति। आकाशवाण्याः दूरदर्शनस्य च सर्वाभिः वाहिनीभिः अस्य कार्यक्रमस्य प्रसारणं भविष्यति।

### यूरोपीयः आयोगस्य उपाध्यक्षा भारतस्य प्रथमाधिकारिकयात्रायां सम्प्राप्तवती

हिमसंस्कृतवार्ता।यूरोपीय आयोगस्य उपाध्यक्षा यूरोपीय संघस्य विदेश प्रकरणानां सुरक्षा नीतेः च उच्चप्रतिनिधिः काजा कल्लासः इत्येषा स्वीय भारतस्य प्रथमाधिकारिकयात्रायां सम्प्राप्तवती। विदेशमन्त्रालयस्य प्रवक्ता रणधीर जायसवालः सामाजिकान्तर्जालीये सन्देशे अवदत् यत्, भारत-यूरोपीयसङ्घयोः सामरिकसहभागित्वम् इतोपि सुदृढंकर्तुं उपयुक्तसमये इयं यात्रा अस्ति। सः अवदत् यत् सुश्री कल्लास-इत्यस्याः यात्रा भारत-यूरोपीय-सङ्घयोः मध्ये नियमित-उच्च-स्तरीय-संवादस्य गतिं वर्धयिष्यति। यूरोपीय-आयोगस्य अध्यक्षस्य उर्सुला वॉन डेर लेयेन इत्यस्य, यूरोपीय-परिषदः अध्यक्षस्य एन्तोनियो कोस्टा इत्यस्य च भारतयात्रायाः प्राक् यूरोपीय-सङ्घस्य विदेशनीति-प्रमुखस्य भ्रमणम् अभवत्, यतः सोमवासरे गणतन्त्रदिवसस्य समारोहे उभौ मुख्यातिथी भविष्यतः। नेतारौ अस्मिन् मासे सप्तविंशति दिनाङ्के प्रधानमन्त्रिणा नरेन्द्रमोदिना सह षोडशतमे भारत-यूरोपीयसङ्घस्य शिखरसम्मेलने सह-अध्यक्षतां करिष्यतः।

### राष्ट्रपतिः गणतन्त्र दिवसस्य पूर्वसन्ध्यायां राष्ट्रम् श्वः सम्बोधयिष्यति

हिमसंस्कृतवार्ता।राष्ट्रपतिपदासीना द्रौपदीमुर्मुः सप्तसप्ततितमस्य गणतन्त्र दिवसस्य पूर्वसन्ध्यायां राष्ट्रम् श्वः सम्बोधयिष्यति। सम्बोधनमिदं आकाशवाणी दूरदर्शनयोः सर्वासु वाहिनीषु हिन्दी आंग्ल-भाषयोः सायं सप्तवादने प्रसारयिष्यते। दूरदर्शन वाहिन्यां हिन्दी आङ्ग्ल- भाषयोः सम्बोधनस्य प्रसारणानन्तरम् दूरदर्शनस्य क्षेत्रीय-वाहिनिभिः प्रादेशिक भाषासु प्रसारणं भविष्यति। आकाशवाणी रात्रौ सार्ध-नववादने क्षेत्रीय-भाषा-संस्करणस्य अस्य प्रसारणं करिष्यति।

## सुभाषितम्

**बुधाग्रे न गुणान् ब्रूयात्,**
**साधु वेत्ति यत: स्वयम्।**
**मूर्खाग्रेऽपि च न ब्रूयाद्,**
**बुधप्रोक्तं न वेत्ति स:।।**

भावार्थ:- कभी भी अपने गुण किसी के सामने स्वयं नहीं प्रकट करने चाहिए क्योंकि किसी बुद्धिमान के सामने गुणों को कहने की आवश्यकता ही नहीं होती वह अपने स्वभाव से स्वयं जान लेते है, वैसे ही मूर्ख के सामने भी गुणों को नहीं कहना चाहिए क्योंकि कहने पर भी वे नहीं समझेंगे।

दैनिकं ई-संस्कृतवार्तापत्रम्
हिमसंस्कृतवार्ताः
हिमसंस्कृतवार्तापत्रस्य एकवर्षस्य सदस्यता
१०० ₹
One year subscription to the daily Sanskrit newspaper is Only 100 Rupees
To subscribe, text us a message saying hello on the number below.
7876636263

सूचना- हिमसंस्कृतवार्ताः दैनिकपत्रे व्याकरणात्मक-अशुध्दीनां कृते, राजनैतिक-सांस्कृतिकविचाराणाञ्च कृते सम्बद्धाः पत्रकाराः लेखकाश्च उत्तरदायिनः भविष्यन्ति

कार्यालयः
हिमसंस्कृतम्, प्रकाशनम्
जसवां कोटला तहसीलपरिसरस्य सम्मुखे
कस्बा कोटला जिला कांगड़ा हि.प्र.
पत्रव्यवाहरसङ्केतः-१७७१११
सङ्केतः- प्रबन्धनिदेशिका- शिवानी शर्मा हिमसंस्कृतम्

## विश्वे मानितः अन्तार्राष्ट्रीय बालिका दिवसः

हिमसंस्कृतवार्ता। अन्तार्राष्ट्रीय बालिका दिवसो विश्विस्मन् हि विश्वे आचरितम्। दिवसोऽयं लैंगिकसमानयाः, शिक्षायाः अवसरानां च महत्वं प्रकाशयति। अन्तर्राष्ट्रीयबालिकादिवसः बालिकानां सशक्तिकरणस्य तासां मानवाधिकारस्य सुरक्षायाः अद्यत्वे आवश्यकतां च प्रकाशयति। दिवसोयं प्रतिवर्ष जनवरीमासस्य चतुर्विंशोदिनाङ्के आचर्यते। समानावसराणां सूजनं, लैङ्गिक भेदभावम् अपाकर्तुं, अपि च एतादृशस्य वातावरणस्य विनिर्माणं यत्र बालिकाः सशक्ताः भूयासुः, एतत् सर्वमपि दिवसास्यास्य उद्देश्यानि वर्तते।

# हिमाचलप्रदेशस्य ४७ नगरनिकायेषु प्रशासकाः नियुक्ताः; विकासकार्याणां कृते सर्वकारेण प्रदत्ताः वित्तीयाधिकाराः




हिमसंस्कृतवार्ताः- कार्यालयीयः प्रतिनिधिः। हिमाचलप्रदेशसर्वकारेण राज्यस्य ४७ नगरनिकायेषु वरिष्ठकार्यकारी- अधिकारिणः, कार्यकारी- अधिकारिणः, सचिवान् च प्रशासकरूपेण (Administrators) नियोक्तुं आदेशाः कृताः। एताः नियुक्तयः तत्कालप्रभावेण जनहितार्थं कृताः सन्ति। सर्वकारेण सर्वेषां सम्बद्ध- जनपदाधिकारिणाम्, उपमण्डलाधिकारिणां, नगरनिकाय- अधिकारिणां च कृते अस्य आदेशस्य कठोरतया पालनं सुनिश्चितं कर्तुं निर्देशः दत्तः। सर्वकारेण प्रसारितादेशानुसारं, हिमाचलप्रदेश- नगरपालिका- अधिनियमः, १९९४ इत्यस्य धारा २६८(१) इत्यन्तर्गतं एषा व्यवस्था कृता अस्ति। आदेशानुसारं नगरनिकायानां सुचारुसञ्चालनाय एसडीएम (SDM) महोदयेभ्यः एकलक्षतः पञ्चलक्षपरिमित- रूप्यकाणां विकासकार्याणां कृते प्रशासकीय-स्वीकृतेः अधिकाराः दत्ताः। एषा प्रशासकीयव्यवस्था तावत्पर्यन्तं प्रचरिष्यति, यावत् सर्वकारः अग्रिमादेशं न ददाति।

## एतेषु नगरनिकायेषु प्रशासकाः नियुक्ताः

येषु ४७ नगरनिकायेषु प्रशासकाः नियुक्ताः, तेषु प्रमुखाः सन्तिः बिलासपुरम्, श्रीनयनादेवीजी, घुमारवीं, चम्बा, डलहौजी, सुजानपुर-टिहरा, नादौन, काङ्गडा, नूरपुरम्, नगरोटा-बगवां, ज्वालामुखी, मनाली, कुल्लूः, भुन्तरम्, सुन्दरनगरम्, जोगिन्द्रनगरम्, करसोगः, रोहडू, रामपुरम्, ठियोगः, नाहनम्, पांवटा-साहिब, नालागढं, परवाणू, अर्की, सन्तोसगढं, गगरेट च।

## कस्माद् कारणात् स्वीकृतः अयं निर्णयः?

नगरविकासविभागस्य प्रमुखसचिवः स्पष्टं कृतवान् यत् नगरनिकायानां दैनिक- प्रशासकीय- विकासात्मककार्याणि येन बाधितानि न भवेयु, तदर्थं एषः निर्णयः स्वीकृतः। अनेन विकासकार्याणां गतिः स्थिरा भविष्यति।

# न स्वमन्त्रिणां, न च कस्यापि पूर्वमन्त्रिणः विरुद्धं काचिद् अन्वेषणा आरब्धा- मुख्यमंत्री सुखविन्द्रसिंह सुक्खुः

हिमसंस्कृतवार्ताः- शिमला। नेतृविपक्षस्य जयरामठाकुरस्य उपमुख्यमन्त्रिणः वा कस्यचित् मन्त्रिणः विरुद्धम् अन्वेषणा आरब्धेति आरोपे, मुख्यमंत्री सुखविन्द्रसिंह सुक्खू अवदत्- शासनस्य समीपं नित्यं पत्राणि आगच्छन्ति। तानि पत्राणि अभिलेखीक्रियन्ते। जयरामठाकुरः उक्तवान् यत् एकस्य मन्त्रिणः विरुद्धम् अन्वेषणा कृता इति। यदा कस्यापि विरुद्धं पत्रं आगच्छति, तदा तस्य अभिलेखीकरणं प्रशासकीयः विधिः अस्ति। कदाचित् मुख्यमन्त्रिणः वा उपमुख्यमन्त्रिणः विरुद्धमपि पत्राणि आगच्छन्ति। अनेकवारं राज्यपालमहाशयेनापि अनुशंसितानि पत्राणि आगच्छन्ति। राज्यसचिवालयस्य बहिः माध्यमैः सह अनौपचारिकसंवादे मुख्यमंत्री सुक्खु अवदत्- शासनं न कस्यचित् मन्त्रिणः विरुद्धं किमपि अन्वेषणं आरब्धवान्, न च भाजपायाः पूर्वशासनकाले मन्त्रिणां विरुद्धम्। जयरामठाकुरस्य विरुद्धमपि पत्रं आगतम् आसीत्, तदपि अभिलेखीकृतम्। यदि कश्चित् तर्कैः सह शपथपत्रेण आगच्छति, तदा विषयः विचार्यते। केचन स्थानान्तरणेन असन्तुष्टाः सन्ति, अत एव एतादृशाः चर्चाः उत्पद्यन्ते। एतादृशानां पत्राणां अभिलेखीकरणं केवलं प्रक्रियामात्रम्। जयरामठाकुरः भविष्यवक्तृत्वं त्यजतु। सः भविष्यवक्ता इव भूत्वा त्रयाणां निर्दलीयप्रत्याशिनां त्यागपत्राणि कारितवान्। भाजपा पञ्चभागेषु विभक्ता अस्ति; कांग्रेसं विभाजयितुं प्रयत्नं न करोतु। जयरामठाकुरस्य कालेऽपि एतादृशानि पत्राणि आगच्छन्ति स्म।

# Himachal Weather - अत्यधिकहिमपातस्य कारणेन कालका-शिमला रेलमार्गः अवरुद्धः



**हिमसंस्कृतवार्ताः- शिमला।** शिमला- समीपवर्ति- क्षेत्रेषु जातस्य भारी-हिमपातस्य वर्षायाः च कारणेन ऐतिहासिकः कालका- शिमला रेलमार्गः अत्यन्तः प्रभावितः जातः। प्रतिकूल-ऋतुकारणेन रेलमार्गे भूस्खलनं (Landslide), वृक्षाणां पाषाणानां च पतनं जातं, येन रेलयानानां आवागमनं दीर्घकालं यावत् स्थगितम् अभवत्। रेल- अधिकारिणां मतेन सनवारा, कुमारहट्टी तथा जतोग क्षेत्रेषु मार्गावरोधेन रेलयानानां विलम्बः जातः। 'हिमालयन क्वीन' इति रेलयानं सनवारावने प्रायः अर्द्धहोरां यावत् निरुद्धम् आसीत्। शिवालिक एक्सप्रेस अपि स्वसमयात् चतुर्घण्टां (4 hours) विलम्बेन शिमलां प्राप्तम्। वरिष्ठः मण्डल- वाणिज्य- प्रबन्धकः नवीन कुमारः अवदत् यत् रेलदलं मार्गं स्वच्छं कर्तुं, यात्रीणां सुरक्षां सुनिश्चितं कर्तुं च निरन्तरं कार्यं कुर्वत् अस्ति। ऋतुस्थितिं दृष्ट्वा रेलयानानां समयेऽपि परिवर्तनं कृतम् अस्ति।

# लोकभवने उत्तरप्रदेश-त्रिपुरा-मेघालय-मणिपुर-राज्याणां स्थापनादिवसस्य आयोजनम्







हिमसंस्कृतवार्ताः - शिमला। शिमला-स्थितस्य लोकभवनस्य प्राङ्गणे उत्तरप्रदेश-त्रिपुरा-मेघालय-मणिपुर-राज्याणां स्थापनादिवस-समारोहः आयोजितः। अस्मिन् अवसरे उत्तरप्रदेश-विधानपरिषदः सदस्यः धर्मेन्द्र भारद्वाजः विशिष्टातिथिरूपेण उपस्थितः अभवत्। लेडी गवर्नर श्रीमती जानकी शुक्ला अपि कार्यक्रमे उपस्थिता आसीत्। राज्यपालः स्वसम्बोधने अवदत् यत् संस्कृतीनां मिलनस्य अयं कार्यक्रमः यत्र अस्माकं पारस्पारिकं सौहार्दं, प्रेम, भ्रातृभावं च सुदृढं कर्तुं सहायकः अस्ति, तत्रैव देशस्य विकासे सर्वेषां सहयोगं अपि सूचयति। सः उक्तवान् यत् प्रधानमन्त्रिणः नरेन्द्रमोदिनः प्रयासैः लोकभवनेषु एतादृश-मिलन-कार्यक्रमैः संस्कृतीनां आदान-प्रदानं भवति, जनाः च एकसूत्रे बध्यन्ते। एतादृशैः कार्यक्रमैः 'एकभारतं श्रेष्ठभारतम्' इति संकल्पना अपि सिध्यति। सः हिमाचले निवसन्तः एतेषां राज्याणां नागरिकाणां कृते स्थापनादिवसस्य शुभकामनाः दत्तवान्। अस्मिन् अवसरे धर्मेन्द्र भारद्वाजः उत्तरप्रदेशसर्वकारस्य संस्कृति-मन्त्रालयेन प्रेषितं स्मृतिचिह्नं तथा च अङ्गवस्त्रं राज्यपालं लेडी गवर्नर महोदयां च प्रति समर्प्य सम्मानितवान्। राज्यपालः सर्वेभ्यः अतिथिभ्यः हिमाचली-टोपिकां तथा च 'अङ्गवस्त्रं' (Muffler) प्रदाय सम्मानितवान्। राज्यपालस्य सचिवः चन्द्रप्रकाशवर्मा महोदयः धन्यवाद-प्रस्तावं प्रस्तुतवान्। अस्मिन् अवसरे उत्तरप्रदेश-त्रिपुरा-मेघालय-मणिपुर-राज्याणां समृद्धां संस्कृतिं प्रदर्शयन्ती एकं लघु-चलच्चित्रम् (Short Film) अपि प्रदर्शितम्। 'पूजा कलामञ्चस्य' कलाकारैः उत्तरप्रदेशस्य सांस्कृतिक-कार्यक्रमः प्रस्तुततः। अतिरिक्त-पुलिस-महानिदेशकः श्री ज्ञानेश्वरसिंहः, पुलिस-उपमहानिरीक्षकः श्रीमती अञ्जुम आरा तथा अन्ये गणमान्याः अपि उपस्थिताः आसन्।

# Kullu News - रघुपुरगढतः १२ पर्यटकानां सुरक्षितं निष्कासनम्; मार्ग-विद्युत्-सेवानां पुनर्स्थापनं तीव्रगत्या प्रचलति

हिमसंस्कृतवार्ताः- कुल्लूः। हिमाचलप्रदेशस्य कुल्लू-जनपदे प्रचण्डहिमपातस्य कारणेन बञ्जार- उपमण्डलस्य रघुपुरगढे निरुद्धाः १२ पर्यटकाः शनिवासरे अपराह्णे प्रशासनेन सुरक्षितं निष्कासिताः। सर्वे पर्यटकाः बञ्जारस्य 'जीभी' क्षेत्रं प्रति आनीताः, तत्र च तेषां वासस्य व्यवस्था कृता अस्ति। पर्यटननगर्यां मनाल्याम् अपि मार्गेषु निरुद्धेभ्यः वाहनचालकेभ्यः पर्यटकेभ्यः च प्रशासनं खाद्यसामग्रीं जलपानं च प्रददाति। पर्यटकानां स्वास्थ्यपरीक्षणाय मनाल्यां मार्गपार्श्वे 'चिकित्सा- शिबिरम्' (Medical Camp) अपि स्थापितं वर्तते। प्रशासनेन मार्ग-निवारणकार्यं तीव्रं कृतं, सायङ्कालं यावत् मनालीमार्गः वाहनानां कृते मुक्तः भविष्यति इति सम्भावना आसीत्। राजस्वविभागस्य कर्मचारिणः पीडितजनानां कृते रसम् (Juice) अन्यानि च भोज्यवस्तूनि नीत्वा गच्छन्तः सन्ति। शनिवारे अपराह्णे कुल्लू-उपत्यकायां ऋतुः स्वच्छः जातः, मन्दा सूर्यप्रभा च विकसिता, येन स्थानीयजनाः सुखस्य निःश्वासं स्वीकृतवन्तः। कुल्लू-उपायुक्तः तोरुल एस. रवीश महोदया अवदत् यत् सर्वेषां निरुद्ध-वाहनचालकानां सम्पर्कः जातः अस्ति, ते च सर्वे कुशलाः सन्ति। नगरपरिषद् मनाली अपि नगरात् हिमं दूरीकर्तुं प्रयत्नशीला अस्ति।

# हिममयं हिमाचलम्- हिमाचले ११ स्थानेषु तापमानं शून्यतः न्यूनम्; किमर्थं आवश्यकी हिमवृष्टिः, अस्मिन् वर्षे विलम्बः किमर्थम्?





**हिमसंस्कृतवार्ताः - शिमला।** हिमाचलप्रदेशे दीर्घकालस्य शुष्कतापीडायाः (Dry spell) अनन्तरं एकस्मिन् दिवसे एव सामान्यतः ५४८ तः ४००० प्रतिशतं यावत् वर्षा अङ्किता। विगत-चतुर्विंशति-होरासु प्रदेशे ४४.८ मिलीमीटर वर्षा अभवत्, या सामान्यात् १६२२ प्रतिशतं अधिका अस्ति। जनपदस्तरे ऊना-जनपदे सामान्यात् ४०६९ प्रतिशतं तथा सोलन-जनपदे ४०९७ प्रतिशतं अधिका वर्षा अभवत्।

### किमर्थं विलम्बेन जातः हिमपातः?

हिमाचलप्रदेशे अस्मिन् वर्षे पश्चिमी-विक्षोभस्य दुर्बलतायाः कारणेन हिमपाते वर्षायां च विलम्बः जातः। यद्यपि पश्चिमी-विक्षोभः सक्रियः अभवत्, परन्तु सः अतीव क्षीणः आसीत्, येन पर्याप्तं आर्द्रता न प्राप्ता।

## हिमपातस्य महत्त्वम्

पर्यावरण- विज्ञान- वायुपरिवर्तन- विभागस्य मुख्यवैज्ञानिकः डॉ. सुरेशचन्द्रः अवदत् यत् हिमपातस्य सर्वाधिकं लाभं कृषिकर्मणे, उद्यानपालनाय, जल-योजनाभ्यः च भवति। जलसंरक्षणम्: वर्षाजलं प्रवहति, परन्तु हिमः शनैः शनैः विलीयते, येन भूमौ दीर्घावधिं यावत् नम्रता (Moisture) तिष्ठति।

## कीट-रोग-निवारणम्-

वृक्षाणां कृते हिमः औषधमिव कार्यं करोति, येन कीट-रोगाणां नाशः भवति।

**ऊर्जा-उत्पादनम्-** हिमनदेषु (Glaciers) अधिकः हिमः ग्रीष्मकाले जलविद्युत्-परियोजनाभ्यः पर्याप्तं जलं प्रदास्यति।

## प्रदेशे सर्वाधिकः हिमपातः

शनिवासरे शिमलायां 'हेली-टैक्सी' सेवा प्रभाविता अभवत्। प्रदेशे सर्वाधिकः हिमपातः कोठी (३.५ पादः), गोंदला (२.८ पादः) तथा केलाङ्ग (२.५ पादः) क्षेत्रेषु अभवत्। शिमला-मनाली-क्षेत्रयोः सपाद-एक पाद-परिमितः (१.२५- १.५ feet) हिमपातः अङ्कितः।

### प्रचण्ड-वातेन वृक्षाः भवनानि च क्षतिग्रस्तानि

प्रदेशे रात्रौ ८० किलोमीटर प्रतिघण्टा वेगेन प्रचण्डवाताः वहन्ति स्म। नारकण्डा (८१ कि.मी.), कुफरी (८० कि.मी.) तथा शिमला (७० कि.मी.) क्षेत्रेषु वातेन वृक्षाः उत्खाटिताः, भवनानां छदः (Roofs) अपि उत्पतितः। ४००० परिमितं विद्युत्- परिवर्तकाः (Transformers) दोषपूर्णाः अभवन्, येन विद्युत्-आपूर्तिः अवरुद्धा अस्ति।

### अग्रिम-पूर्वानुमानम्: पुनः हिमपातस्य सचेतना

वरिष्ठ- वैज्ञानिकः सन्दीपकुमारशर्मा अज्ञापयत् यत् २६- २७ जनवरी दिनाङ्कयोः पश्चिमी-विक्षोभः पुनः तीव्रः भविष्यति। अतः प्रदेशे व्यापक-हिमपातस्य पीतसचेतना कृता। प्रदेशे न्यूनतमतापमाने ७ डिग्री पर्यन्तं ह्रासः जातः।

## ११ स्थानेषु तापमानं शून्यतः न्यूनम्

अस्मिन् ऋतौ प्रथमवारं ११ स्थानेषु तापमानं शून्यतः न्यूनम् अङ्कितम्। कुकुमसेरी -७.२ डिग्री तापमानेन सर्वाधिकं शीतलं स्थानं वर्तते। अन्यानि स्थानानि सन्तिः

**ताबोः - ६.०°**
**नारकण्डाः - ४.२°**
**कल्पाः - ३.८°**
**शिमलाः - ०.५°**
**मनालीः - ०.४°**

# पूर्णराज्यत्वदिवस : मुख्यमन्त्री अद्य परागपुरे प्रदानं करिष्यति उद्घोषणा, कर्माचारीभ्यः अस्ति आशा



मुख्यमंत्रीसुखविंदरसिंहसुखु कांगड़ामण्डलस्य परागपुरे अद्य पूर्णराज्यत्वदिवसस्य राज्यस्तरीये कार्यक्रमे भागं ग्रहीष्यति। सः अवसरस्य उपयोगं कृत्वा नूतनघोषणा अपि कर्तुं शक्नोति। पूर्वं मनाली-सुलह-विधानसभाक्षेत्रयोः भ्रमणकाले मुख्यमन्त्री एप्रिल-मासस्य प्रथमदिनात् महिलाभ्यः ₹१५००-रूप्यकाणां अनुदानस्य घोषणां कृतवान् । राज्यव्यापीं कदा एषा घोषणा भविष्यति इति द्रष्टुं महिलाः अद्यापि प्रतीक्षन्ते। इदानीं राज्यसर्वकारस्य कर्मचारिणः पूर्ववेतनआयोगात् स्वस्य महती धनराशेः विषये च चिन्तिताः सन्ति। ततः मुख्यमन्त्री विधानसभायाः बजटसत्रे भागं गृह्णीयात्। अतः नूतनबजटात् पूर्वं पूर्णराज्यत्वदिवसस्य मञ्चात् किमपि प्रमुखं घोषणां भविष्यति वा? सर्वे उत्सुकतापूर्वकम् एतस्य प्रतीक्षां कुर्वन्ति। विपरीतवातावरणकारणात् मुख्यमन्त्री अस्य राज्यत्वदिवसस्य आयोजनाय मार्गमार्गेण शिमलातः प्रस्थानम् अकरोत्। नादौन्-नगरे रात्रौ वसन् सः प्रातःकाले परागपुरे भविष्यति, ततः शिमलानगरं प्रत्यागमिष्यति, यतः ऐतिहासिक-रिड्ज्-क्रीडाङ्गणे राज्यस्तरीयं गणतन्त्र-दिवसस्य समारोहः आयोजितः अस्ति

# हिमाचलप्रदेशस्य बालिकाः हरियाणां पराजित्य अण्डर- १९ कबड्डी चैंपियन इति अभवन्

**हिमसंस्कृतवार्ताः- शिमला।** हिमाचलप्रदेशस्य कन्याः राष्ट्रिय-अण्डर-१९ कन्या- कबड्डी- प्रतियोगितायां चैंपियनपदं प्राप्तवत्यः। शुक्रवासरे सम्पन्ने कठिने रोमाञ्चकच फाइनल-क्रीडायां प्रदेशीयदलं हरियाणादलं केवलं चतुर्भिः अङ्कैः पराजितवती। अस्मिन् मुकाबले उभयदलेनापि उत्कृष्टं क्रीडाप्रदर्शनं कृतम्। हरियाणायाः वंशिका श्रेष्ठ-रेडर आसीत्, तथैव श्रेष्ठरक्षकः (डिफेण्डर) अपि हरियाणायाः पलक आसीत्। प्रथम- अर्धे हिमाचलस्य क्रीडिकाभिः प्रभावशालीं क्रीडां दर्शयित्वा २० अङ्काः अर्जिताः, यदा हरियाणादलस्य केवलं १२ अङ्काः आसन्। हिमाचलस्य अष्ट-अङ्कीयः अग्रत्वः आसीत्। द्वितीय- अर्धे हरियाणादलम् अपि उत्कृष्टं प्रदर्शनं कृत्वा पुनरागमनं कृतवान्, विपक्षिदलस्य अग्रत्वं समाप्तं कृत्वा स्वयम् अग्रे स्थितम्। एकस्मिन् क्षणे हरियाणा ३५–३० अङ्कैः पञ्च-अङ्कीयेन अग्रत्वेन अग्रे आसीत्। तदा एषा ट्रॉफी हिमाचलस्य हस्तात् निष्क्रान्ता इव दृश्यते स्म।

तस्मिन्नेव समये हरियाणायाः मुख्य- आक्रान्ता (रेडर) बहिर्गतायां सति हिमाचलस्य क्रीडिकाभिः द्वि–त्रीणि उत्तमानि ग्रहणम् (टैकल) कृत्वा दलं पुनः क्रीडायां प्रत्यानीतम्। तस्मिन्नन्तरे दैवमपि हिमाचलस्य अनुकूलं जातम्, पञ्चनिमेषेषु एव क्रीडायाः दिशा परिवर्तिता। चतुर्भिः अङ्कैः अग्रत्वं स्थापयित्वा हिमाचलस्य क्रीडिकाभिः खिताबः विजितः। क्रीडासमाप्तौ हिमाचलप्रदेशः ४८ अङ्कान्, हरियाणादलम् ४४ अङ्कान् प्राप्तवान्। सम्पूर्णे प्रतियोगितायाम् उभयदलेनापि एकस्यामपि स्पर्धायां न पराजितः।

तृतीयस्थानार्थे सम्पन्नस्पर्धायां तमिलनाडु-दलेन श्रेष्ठं प्रदर्शनं कृत्वा २७–२३ अङ्कैः उत्तरप्रदेश-दलं पराजितम्। एवं तमिलनाडु तृतीयस्थानं, उत्तरप्रदेशः चतुर्थस्थानं च प्राप्तवान्। महाराष्ट्रः पञ्चमं, छत्तीसगढः षष्ठं, दिल्ली सप्तमं, मध्यप्रदेशदलम् अष्टमं स्थानं लब्धवान्। प्रतियोगितायाः समापनसमारोहस्य मुख्यातिथिः दूनविधायकः रामकुमारचौधरी, विशेषातिथिः नालागढविधायकः हरदीपबावा च आस्ताम्। ताभ्यां विजेता-उपविजेता-दलेभ्यः ट्रॉफी-प्रमाणपत्रैः सम्मानं कृतम्।

## क्रीडासंग्रामें: कलहःअपि अभवत्

क्रीडाकाले बहुशः कलहः अपि जातः। हरियाणादलस्य क्रीडिकाः पुनः पुनः अङ्कान् विषये आपत्तिं कृतवत्यः, येन त्रि–चतुर्वारं क्रीडा मध्ये स्थगिता। हरियाणादलस्य क्रीडिकाभिः कदाचित् दुर्व्यवहारोऽपि कृतः, यस्य कारणेन ताभ्यः येलो-कार्ड प्रदर्शितः।

## बिलासपुरस्य रोहिणी-ठाकुरस्य हिमाचल-सीनियर- राष्ट्रीय- कबड्डीदले चयनम्

जनपदे क्रीडाप्रतिभाः राष्ट्रियस्तरे स्वकीयं प्रभावं दर्शयन्ति। अस्यां श्रेण्यां बिलासपुरस्य श्रेष्ठक्रीडका एफ कबड्डी- क्रीडिकायाः रोहिणी-ठाकुरस्य चयनः हिमाचलप्रदेशस्य वरिष्ठ- राष्ट्रीय- महिला- कबड्डी-दलाय अभवत्। रोहिणी वर्तमानकाले स्टेट- छात्रावास-बिलासपुरे कबड्डीक्रीडायाः सूक्ष्मताः शिक्षते। स्टेट-छात्रावास-बिलासपुरस्य प्रशिक्षकः मनोजठाकुरः अवदत् यत् रोहिणी नम्होलक्षेत्रस्य घायलग्रामस्य निवासिनी अस्ति। रोहिण्याः पिता पहलवान् जगजीतसिंह-ठाकुरः युवा- सेवा- क्रीडाविभागे सेवां ददाति। गृहे क्रीडामय-वातावरणात् रोहिण्याः रुचिः बाल्यकालात् एव कबड्डीक्रीडायाम् आसीत्।

## महिलाभ्यः आर्थिकस्वायत्तता आवश्यकी- डॉ. मेधाकानेटकर

# महिलाभिः स्वयं स्वव्यक्तित्वस्य निर्माणं करणीयम्- प्रो. ललिता चन्द्रात्रे





हिमसंस्कृतवार्ताः- डॉ. रेणुका बोकारे, नागपुरम्। कविकुलगुरु- कालिदास- संस्कृत- विश्वविद्यालयेन 'संस्कृतप्रज्ञायाः आलोकं महिला- सशक्तीकरणस्य दृष्टिकोणम्' इति विषये एकदिवसीय- राज्यस्तरीय- सम्मेलनं सम्पन्नम्। कविकुलगुरु- कालिदास- संस्कृत- विश्वविद्यालयस्य पक्षतः 'स्वयंसिद्धा– स्त्रीप्रेरणामहोत्सवस्य' अन्तर्गतं “नारी तू नारायणी– संस्कृतप्रज्ञायाः आलोकं महिलासशक्तीकरणस्य दृष्टिः” इति विषये एकदिवसीय- राज्यस्तरीय- सम्मेलनस्य आयोजनं विहितम्। अस्य सम्मेलनस्य कृते केन्द्रीयसंस्कृतविश्वविद्यालयात् (नवदेहली) आर्थिकानुदानं प्राप्तम् अस्ति। उद्घाटनसमारोहे मुख्यतिथिरूपेण श्रीनिकेतनमहाविद्यालयस्य प्राचार्या डॉ. मेधा कानेटकर, सारस्वतातिथिरूपेण डॉ. मंजुश्री सरदेशपाण्डे, विशेषातिथिरूपेण कर्नाटकसंस्कृतविश्वविद्यालयस्य प्रो. शिवानी वी., सम्पूर्णबांबूकेन्द्रस्य (मेळघाट) अध्यक्षा निरुपमा देशपाण्डे उपस्थिताः आसन्। कार्यक्रमस्य अध्यक्षता शिक्षाशास्त्रसङ्कायस्य अधिष्ठात्री प्रो. ललिता चन्द्रात्रे कृतवती।

### उद्घाटनं प्रदर्शनी च-

माननीयकुलगुरोः डॉ. अतुलवैद्यस्य मार्गदर्शने आयोजितस्य अस्य सम्मेलनस्य उद्घाटनं दीपप्रज्ज्वलनेन अभवत्। अस्मिन् अवसरे महाराष्ट्रस्य विभिन्नजनपदेभ्यः आगतानां महिलानां हस्तकलानां 'स्वयंसिद्धा प्रदर्शनी' इत्यस्याः उद्घाटनं डॉ. मेधा कानेटकरमहोदयायाः करकमलैः सम्पन्नम्। अतिथयः उत्पादान् क्रीत्वा आत्मनिर्भरमहिलानाम् उत्साहवर्धनं कृतवन्तः।

### नारायणी सम्मानः वक्तृणां विचाराश्च

विश्वविद्यालयेन जनजातीयक्षेत्रेषु उल्लेखनीयं कार्यं कुर्वतां वैद्यानां उद्यमिनां च 'नारायणी सम्मानः' प्रदत्तः। डॉ. मेधा कानेटकरः सा अवदत् यत् महिलाभिः पारम्परिकं परतन्त्रमानसिकतां त्यक्त्वा स्वतन्त्ररूपेण निर्णयः स्वीकरणीयः। केवलं धनार्जनं पर्याप्तं नास्ति, अपि तु आर्थिकस्वायत्तता आवश्यकी अस्ति।

### महिलाभिः स्वकीया आत्मशक्तिः संवर्धनीया- डॉ. मंजुश्री सरदेशपाण्डे

डॉ. मंजुश्री सरदेशपाण्डेः सा उक्तवती यत् स्त्री मूलतः स्वयंसिद्धा अस्ति, सा आत्मिक- भावनात्मकदृष्ट्या सक्षमा वर्तते। प्रो. कलापिनी अगस्तीः सा कालिदासस्य श्लोकानां माध्यमेन स्त्री-पुरुषयोः समन्वयस्य, परस्परसम्मानस्य च महत्त्वं प्रतिपादितवती।
अध्यक्षीये उद्बोधने प्रो. ललिता चंदात्रे अकथयत् यत् नैरन्तर्येण शिक्षणं व्यक्तित्वनिर्माणाय आवश्यकं वर्तते। समाजे परिवारे व्यक्तिगतस्तरे च अनेके संघर्षाः भवन्ति। परन्तु महिलाभिः धैर्यपूर्वकं स्वव्यक्तित्वस्य विकासः कर्तव्यः।

### प्रकाशनं परिचर्चा च-

गीतप्रकाशनम्- देहल्यां आयोज्यमानायाः 'भारती– नारी से नारायणी' परिषदः 'सिग्नेचर गीतस्य' प्रकाशनं कृतम्। अस्य गीतस्य शब्दरचना अदितीदेशमुखेन कृता, स्वरश्च डॉ. मञ्जिरी वैद्य- अय्यरमहोदयया दत्तः।

### विद्वत्-पत्रिकाः-

संस्कृतविदुषीणां अवदानाधारितायाः 'संस्कृत– सारस्वत– विदुषी' इति विशेषपत्रिकायाः विमोचनं कृतम्।
**संवादः**- 'संवाद स्वयंसिद्धाओं से' इत्यन्तर्गतं मेळघाटक्षेत्रे कार्यरता निरुपमा देशपाण्डे, डॉ. अश्विनी बुजोणे महोदयाभ्यां च सह डॉ. रेणुका बोकारे महोदया संवादं कृतवती। 'विकसितभारतम् २०४७' इत्यस्मिन् महिलानेतृत्वस्य भूमिकायाः उपरि अपि एका महत्त्वपूर्णा परिचर्चा आयोजिता। कार्यक्रमस्य सञ्चालनं प्रो राधा देशकर महोदया कृतवती, आभारप्रकटनं च डॉ. श्वेता शर्मा महोदया अकरोत्।

# योगः मानसिकशान्तेः, आत्मानुशासनस्य च आधारः- "स्वामीविश्वपालजयन्तः“



### कण्वाश्रमे योगप्रतियोगितायाः भव्यम् आयोजनम्

कण्वाश्रमे वैदिकगुरुकुलमहाविद्यालये वैदिक- वटुभिश्च सार्थकयोगशालाद्वारा, क्रेडिल- पब्लिक- स्कूल इत्यनेन च गुरुकुल- महाविद्यालय- ज्वालापुर- हरिद्वारद्वारा च छात्रछात्रामाध्यमेन विविधाः योगासनप्रदर्शनं कृतम्। अस्यां योगप्रतियोगितायां राष्ट्रीयस्तरस्य प्रतिभागिनः अपि उत्साहपूर्वकं सहभागितां कृतवन्तः। बालकानां बालिकानां च योगप्रदर्शनं दृष्ट्वा सर्वे दर्शकाः अतीव विस्मिताः अभवन्। कार्यक्रमे निर्णायकमण्डले सन्तोषी रावतप्रशिक्षिका, सोनमरावतप्रशिक्षिका, शुभमरावतप्रशिक्षिकः, कविता कण्डवालप्रशिक्षिका, प्राचार्यः संजयरावतः इत्येते विशिष्टाः व्यक्तयः निर्णायकभूमिकां निर्वहन्तः आसन्।
योगप्रतियोगिताकार्यक्रमः वैदिकगुरुकुल– कण्वाश्रमे स्वामीविश्वपालजयन्तवर्यस्य परमसान्निध्ये समुपस्थितोभवत्। प्रतियोगितायाः शुभारम्भे स्वामिवर्यश्च गुरुकुलस्य प्रधानाचार्यः मनमोहननौटियालः, योगमहाविद्यालयस्य प्राचार्यः संजयः रावतः, डॉ. राजवीरवर्यः, डॉ. रमाकांतकुकरेती, हेमन्ततिवारीवर्यः स्वामी विरक्तदेवः, पूजा अग्रवालवर्या, डॉ. मेजर वीरपालविद्यालंकारः, जयवीररावतः, सचिनरावतः, रविन्द्ररावतश्च सार्थकयोगशालायाः संरक्षकः राकेशकण्डवालः, संस्कृतभारत्याः नगराध्यक्षः डॉ. रमाकान्तकुकरेती, विभाग– सहसंयोजकः कुलदीपमैन्दोला च गुरुकुलस्य सहभागिनः आचार्याः गणमान्याः अतिथयः दीपप्रज्वलनं कृतवन्तः। प्रारम्भे वैदिकवटुभिः सरस्वतीवन्दनं च मन्त्रोच्चारणं विहितं सहैव च सार्थककण्डवालद्वारा संगीतमययोगः प्रदर्शितः, सौम्यासंस्कृतिद्वारा अपि प्रारम्भिकयोगमयीप्रस्तुतिः प्रदत्ता।
अस्मिन् अवसरे योगस्य शारीरिक– मानसिक– आध्यात्मिकमहत्त्वं वक्तृभिः प्रतिपादितम्। योगेन जीवनं स्वस्थं, संयमितं च भवतीति सर्वेषां संदेशः प्रदत्तः। कार्यक्रमस्य अन्ते आयोजकैः प्रतिभागिनां प्रशंसा कृत्वा उज्ज्वलभविष्यस्य शुभाशयाः व्यक्ताः।
अस्मिन् अवसरे आश्रमस्य संस्थापकः स्वामी विश्वपालजयन्तः योगस्य महत्त्वं प्रतिपादयन् अवदत्- योगः न केवलं शारीरिकस्वास्थ्यस्य साधनम्, अपि तु मानसिकशान्तेः, आत्मानुशासनस्य च आधारः अस्ति। योगाभ्यासेन जीवनं संतुलितं भवति, मनः प्रसन्नः भवति, व्यक्तित्वस्य सर्वाङ्गीणः विकासश्च जायते।डॉ. मेजर वीरपालविद्यालंकारः छात्रान् “ऑपरेशनसिन्दूर” इति विषयकम् उदाहरणं प्रस्तूय योगस्य अनुशासनं, साहसं, राष्ट्रसेवाभावं च प्रेरणारूपेण अवदत्। डॉ. रमाकान्तकुकरेती अपि स्ववक्तव्ये अवदत् यत् योगः जीवनं दृढं करोति, कष्टेषु धैर्यं ददाति, आरोग्यं च वर्धयति। कार्यक्रमे हेमन्ततिवारीवर्यः स्वामी विरक्तदेवः, पूजा अग्रवालवर्या, जयवीररावतः, सचिनरावतः, रविन्द्ररावतश्च स्व– स्व विचारान् व्यक्तवन्तः। योगप्रतियोगितानां संचालनं कुलदीपमैन्दोलामहोदयेन च मञ्चीयस्वागतस्य सुचारु– सञ्चालनं डॉ. राजवीरवर्येण कृतम्। योगस्य त्रिविधसंयोजनं राकेशकण्डवालमहाभागेन अत्यन्तं कुशलतया प्रदर्शितं, येन उपस्थितानां मनांसि भृशं प्रफुल्लितानि अभवन्।

# शासकीय हाई स्कूल झालारी ग्रामे आयोजितः वसंतपञ्चमोत्सवः




**हिमसंस्कृतवार्ताः - जगदीश डाभी**

माघ शुक्लपञ्चमी दिनाङ्के झालारी ग्रामस्य शासकीय-उच्चविद्यालय- परिसरे वसंतपञ्चमी पर्वणः अतीव-उत्साहेन आनन्देन च आयोजनं कृतम्। कार्यक्रमस्य आरम्भः प्राचार्यः अतिथिः च भारतीय वैदिकसंस्कारैः सह मातृ सरस्वत्यः पूजनम् अर्चनम् कृतम्। कार्यक्रमस्य आरम्भः देवी वीणापाण्याः पूजां कृत्वा या कुंदेन्दुतुषारहारधवला इत्यस्य मंगलाचरणनृत्येन च अभवत्। अस्मिन् अवसरे छात्राः काव्यानि, गीतानि, नृत्यानि, बौद्धिकभाषणानि च प्रस्तुतवन्तः। प्राचार्यः शंकरशुक्लामहोदयेन वसंतपञ्चमीदिने स्वर्णशलाकया बालजिह्वायां प्रथमाक्षरं ॐ इति वैदिकपरम्परां वृत्तान्तं कृत्वा सरस्वतीवन्दन विषये भारतीयसंस्कार विषये व्याख्यानं दत्तम्। संस्कृताध्यापकः रामप्रसाद शर्मणः षोडश वैदिक संस्कारस्य महत्त्वं व्याख्यातवान्। गुरुकुलं शिक्षा व्यवस्थायां छात्रस्य गुरुकुले प्रवेशः, उपनयन समारोहः च गुरुपूर्णिमायां भवति स्म, श्रावण- पूर्णिमायां वेदस्य अध्ययनं प्रारभ्यते स्म। शिक्षासमाप्तेः अनन्तरं अद्यतन विश्वविद्यालयेषु दीक्षांत समारोहात् अधिकं विशेषं वसंतपञ्चमीदिने समापनसमारोहः आयोजनं कृतम्। अतिथि अनुरुपेण विद्यालये आमन्त्रित ग्रामपंचायत सरपंच प्रतिनिधि महौदयः कालूराम गुर्जरः छात्र- छात्राः जीवनं सफलं कर्तुं गुरुजनानाम् आदरं कर्तुं प्रयत्नपूर्वकम् अध्ययनं च कर्तुं प्रोत्साहयति स्म। विद्यालयस्य शिक्षकः मुकेश भेपरिया, राज सर्वा, एम. एफ. कादरी, अंजुम बानो, बबलू गुर्जरः वसंतपंचम्यां बौद्धिक उद्बोधनं प्रदान कृत्वा छात्र- छात्राणां मार्गदर्शनं कृतम्। बालिकाः मातुः शारदायाः सांस्कृतिकप्रस्तुतिं कृत्वा वसन्तपंचमीमहोत्सवे कार्यक्रमं विशिष्ट स्थानं प्रदतवन्तः। अस्मिन् उत्सवे शिक्षकाः छात्राः च पीतानि वस्त्राणि धारयन्ति स्म, येन विद्यालयस्य परिसरे ऋतुराजवसन्तस्य आगमनस्य दृश्यं दृश्यते स्म।



हिमसंस्कृतवार्ताः , ईदरधीरजः,हैदराबादः

# वार्ता-संवादः

नन्दिनी- नमो वः। अद्यतने वार्ता-कार्यक्रमे स्वागतं करोमि। नमस्ते काव्ये।
काव्या- नमस्ते नन्दिनि। अमेरिका-देशे एकः शुनकः स्वामिना पुनः प्राप्तः। सः दश-वर्षाणि यावत् नष्टः भूतः। तस्य शरीरे एकः एकीकृत-परिपथः (microchip) भूतः, तेन एव सः अभिज्ञातः।
नन्दिनी- एतत् तु अतीव आनन्द-दायकम्। अन्यत् श्रूयताम्। एकेन विदेशीय-यात्रिकेण भारतीय-आतिथ्यं प्रशंसितम्। यदा सः उद्याने भ्रमन् भूतः, तदा अपरिचितैः जनैः सः चाय-पानार्थम् आहूतः। तेन महान् सन्तोषः अनुभूतः।
काव्या- "अतिथिदेवो भव" इति अस्माकं संस्कृतिः खलु। किन्तु हिमाचले कैश्चित् पर्यटकैः अनुचित-व्यवहारः कृतः। हिम-पाते सति अपि तैः निर्वस्त्रैः भूत्वा नृत्यं कृतम्। तैः मार्गः अवरुद्धः, कोलाहलः च कृतः। एतेन स्थानीय-जनाः कुपिताः।
नन्दिनी- ईदृशं कृत्यं लज्जास्पदम् अस्ति। अन्यत् श्रूयताम्। अमेरिका-देशे चिकित्सा कियती बहु-व्यय-साध्या अस्ति, इति एकेन प्रवासिना भारतीयेन उदितम्। नवति-निमेष-मात्रस्य चिकित्सा-व्ययः लक्षाधिक-रूप्यकैः परिमितः भूतः। तत् श्रुत्वा सर्वे आश्चर्य-चकिताः।

# बोधकथा



एकस्मिन् लघुग्रामे एकः दरिद्रः कृषकः निवसति स्म। तस्य लघु कृषिक्षेत्रम् आसीत्, परन्तु तस्य सस्यानि प्रायः विफलानि भवन्ति स्म । एकदा सः चिन्तितवान् यत् "यदि अहं मम क्षेत्रस्य समीपे लघुतडागं निर्मामि तर्हि अनावृष्ट्या अपि मम सस्यं रक्षितुं शक्यते" इति ।
सः एकं तडागं खन्तुम् आरब्धवान् । ग्रामजनाः हसन्नाह- "एतत् असम्भवम्! एकः एव जनः तडागं खन्तुं न शक्नोति" , परन्तु कृषकः प्रतिदिनं नैरन्तर्येण खननं कुर्वन् आसीत् ।
कतिपयेषु मासेषु सः एकं सुन्दरं तडागं निर्मितवान् । वर्षा अभवत्, तडागः जलपूर्णः, तस्य सस्यानि च प्रफुल्लितानि आरब्धानि । इदानीं ग्रामजनाः तस्मात् एव तडागात् जलं ग्रहीतुं आरब्धवन्तः। सः कृषकस्य परिश्रमस्य प्रशंसाम् अकुर्वन्, दृढनिश्चयेन परिश्रमेण च असम्भवमपि सम्भवं भवितुम् अर्हति इति ज्ञातवान् ।
🔹 पाठः- धैर्येन परिश्रमेण च यत्किमपि लक्ष्यं साधयितुं शक्यते।
लेखकः- डॉ.अमनदीपशर्मा, हिमसंस्कृतवार्ताः

# केचन मनसः मौक्तिकाः



{१} नदी व्याकुला अस्ति----
सागरः माम न आह्वयति----
सागरः विचलितम् अस्ति-----
कि कथम् आह्वयामि------
नदी तु माम न पश्यति-------
💕 💕
{२} पापं शरीरं न करोति----
विचाराणि पापानि कुर्वन्ति-----
गङ्गानदी विचाराणि न प्रक्षालयन्ति----
अपि तु केवलं शरीरं प्रक्षाल्यति-----
{३} अस्थिभ्यः विसर्जनार्थं बहुनि
श्मशानानि सन्ति----
परन्तु नास्ति कोऽपि स्मशानम्
यत्र स्मरणस्य (यादों का)
विसर्जनं भवति |

**डा. वर्षा प्रकाश टोणगांवकर पुणे / महाराष्ट्रम्**

# गणतन्त्रदिवसः

भारतदेशः १९४७ तमवर्षस्य आगष्टमासस्य १५ दिनाङ्के स्वतन्त्रः अभवत् । अनन्तरं प्रजाप्रभुत्वरीत्या अत्र प्रशासनं चलति स्म । यदा संविधाननिर्माणकार्यं समाप्तम् अभवत् तदा संविधानम् अङ्गिकृत्य देशे १९५० तमे वर्षे जनवरीमासस्य २६ दिनाङ्के भारतदेशं प्रजाप्रभुत्वराष्ट्रामिति धोषितवन्तः । तद्दिनादाराभ्य भारतदेशे भारतीय-संविधानरीत्या प्रशासनं प्रचलति ।
गणतन्त्रदिनस्य अलङ्कारः प्रजाराज्योत्सवं प्रजाराज्योत्सवः गणराज्योत्सवः इत्यपि कथयन्ति । यतः गणानां प्रजानां एव अत्र प्रामुख्यता अस्ति । प्रजाराज्यमित्यस्य प्रजाभिः प्रजाभ्यः प्रजाः एव प्रशासनं कुर्वन्ति इत्यर्थः भवति । भारतस्य प्रजासत्तात्मकजात्यतीतगणराज्यम् इति च नाम अस्ति । जनवरी मासस्य २६ तमे दिनाङ्के एव लाहोर-अधिवेशने पूर्णस्वातन्त्र्यलाभाय निर्धारः कृतः आसीत् । तस्य स्मरणार्थं जनवरीमासस्य २६ दिनाङ्कः एव स्वीकृतः अस्ति । प्रतिवर्षं वैभवेन प्रजाराज्योत्सवः आचर्यते । विदेशीयाः अतिथिरुपेण आगच्छन्ति । मुख्यकार्यक्रमः राजधान्याः परेड्स्थाने राष्ट्रपतिभवनस्य पुरतः प्रचलति । देशे सर्वत्र कार्यालयेषु विद्यालयेषु सङ्घसंस्थासु च कार्यक्रमं कुर्वन्ति । ध्वजारोहणं राष्ट्रगीतं विविधस्पर्धाः मनोरञ्जनकार्यक्रमाः च सर्वत्र प्रचलन्ति । राष्ट्रियपर्वरुपेण प्रजाराज्योत्सवम् आचरन्ति । भारतदेशः सुखीराज्यं भवतु इति सदाशया सर्वजनहिताय सर्वजनसुखाय संविधाननिर्माणकार्यस्य आरम्भः अभवत् ।देशे तथा विदेशेषु च भारतस्य सामाजिक-आर्थिक-सांस्कृतिक-वैभवस्य प्रदर्शनं तथा शान्ति- सुव्यवस्थास्थापनं विदेशैः सह उत्तमसम्बन्धस्थापनम् इत्यादीनि संविधानस्य उद्देश्यानि । भारतीय संविधानम् लिखितं संविधानम् अस्ति । अत्र ३९५ विधयः, अष्ट-अनुसूच्यः सन्ति । संविधान- रचनासमितेः अध्यक्षः भारतदेशस्य राष्ट्रपतिः श्री बाबूराजेन्द्रप्रसादः आसीत् । संविधानसङ्कलनसमितेः अध्यक्षः डा बी आर् अम्बेड्करः आसीत् ।

